भेदार्थो भ्वादौ पाठ इति केचित्। इति दुर्गादासः॥

कैकयी, स्त्री, (जनपदात् क्षत्त्रियात् अञ् । यद्वा, केकय + स्वार्थे अण् । कैकय + बाहुलकात् न यादे रियादेशः । तस्यापत्यं स्त्री ङीप् ।) कैकयी । इति शब्दरत्नावली ॥

कैकेयी, स्त्री, (कैकेयः केकयराजः तस्यापत्यं स्त्री ङीप्।) कैकयी । सा तु केकयराजकन्या दशरथ-राजपत्नी च । इति शब्दरत्नावली ॥
(यथा, रघौ। १२ । २ ।
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा" ॥)

कैङ्कर्य्यं, क्ली, (किङ्करस्य भावः किङ्करस्येदं किङ्करस्य-कर्म्म वा । किङ्कर + यञ् ।) किङ्करत्वम् । दासत्वम् ॥ (यथा, भागवते । ३ । २ । २२ ।
"तत् तस्य कैङ्कर्य्यमलं भृतान् नो
विग्लापयत्यङ्ग ! यदुग्रसेनम्" ॥)

कैटजः, पुं, (कुटज एव स्वार्थे अण् वृद्धिः । पृषोदरात् औकारस्य ऐकारत्वम् ।) कुटजवृक्षः । इति भावप्रकाशः ॥

कैटभः, पुं, स्वनामख्यातो दैत्यविशेषः ॥ (अयन्तु विष्णोःकर्णमलोद्भूतयोरसुरयोरन्यतरः । पाद्मकल्पे जातः सन् एकार्णवे योगनिद्रायां स्थितस्य भगवतो नाभिपद्मादाविर्भूतं अब्जयोनिं ब्रह्माणं यदा हन्तुमुद्यतः तदा योगनिद्रां विहाय समुत्थितेन भगवता जघनोपरि समुत्थाप्य निहतोऽयं दुर्द्दान्तोऽसुरः॥) यथा,— मार्कण्डेयपुराणम् ।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ" ॥
(एतस्योत्पत्त्यादिकं सविस्तरं हरिवंशे ५२ अध्याये दर्शनीयम् ॥)

कैटभजित्, पुं, (कैटभं स्वनामख्यातमसुरं जितवान् । जि + भूते क्विप् । तुगागमश्च ।) विष्णुः । इत्यमरः ॥ (अस्य विवरणं हरिवंशे ५२ अध्याये द्रष्टव्यम् ॥)

कैटभहा, [न्] पुं, (कैटभं स्वनामख्यातं महासुरं हन्ति हतवान् वा । हन् + क्विप् भूते ।) विष्णुः । इति हेमचन्द्रः ॥ (स च सर्व्वशक्तिर्भगवान् स्वरूपतो निर्गुणोऽपि सृष्ट्यादिकार्य्यसम्पादनार्थं गुणाधिष्ठातृत्वमभ्युपैति, तत्र तु यदा जीवादृष्टवशात् यद्यद्गुणोद्रेकात्मिका क्रियाशक्तिरुपतिष्ठते नितरां गुणाधिष्ठातृकतया भगवानपि तदा तत्तद्गुणोपयोगिक्रियावानिव प्रतिभाति । परं देहाभिमानवतां जीवानामिव तस्य प्रकृतेरुद्रिक्तगुणे मनो न ह्यासज्जते हृषीकेशत्वात् गुणनियन्तृत्वादित्यर्थः देहाभिमानराहित्याच्च । अत एव स कैटभजिन्मधुजिदित्याद्युपाधिकतयोच्यते वस्तुतस्तु जीवैर्यत् किञ्चित् क्रियते तत् सर्व्वमेव गुणपरतन्त्रैरवशैरेव । ईश्वरस्य तु भृत्या इव गुणा एवाधीनाः सन्तः तदाज्ञयैव क्रिया उत्पादयन्ति सम्पादयन्ति च ॥)

कैटभा, स्त्री, (कूटा गुणातीतत्वाद्दुर्ज्ञेया सृष्ट्यादिकं कैटं । कूट + अण् वृद्धिः पृषोदरात् औकारस्य ऐकारत्वं । तेन तैर्वा भाति प्रकाशते या । भा + क्विप् ।) दुर्गा । इति त्रिकाण्डशेषः ॥

कैटभारिः, पुं, (कैटभस्य स्वनामख्यातस्यासुरभेदस्य अरिः शत्रुः । पक्षे कैटभस्य तमसः अरिर्दमयिता । सगुणावस्थायामपि ईश्वरस्य विष्णोः सत्त्वगुणप्राधान्यात् तथात्वम् ।) विष्णुः । इति हलायुधः ॥

कैटभी, स्त्री, (कैटभं तदाख्यया प्रसिद्धं असुरं प्रति इः हननक्रियारूपतेजःप्रकाशोऽस्याः ।) यद्वा, कूटं तमःप्रधानभावमधिष्ठाय तामसी प्रकृतिरिति विश्रुता देवकार्य्यसाधनानुरोधात् तद्वत्तया भातीति । कूट + अणि वृद्धौ कौटं पृषोदरात् औकारस्य ऐकारत्वं कैटं भा + कः । ततो ङीप् कैटभी तामसीत्यर्थः ॥) दुर्गा । इति त्रिकाण्डशेषः । (मधुकैटभभीतब्रह्मणस्तुत्या प्रसादिततया तामस्या विमोहितौ तौ दुर्द्दान्तावसुरौ विष्णुना निहतौ । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८१ अध्याये ।
"एवं स्तुता तदा देवी तामसी तत्र वेधसा ।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः" ॥
इत्युपक्रम्य ।
"समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ॥
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्" ॥)

कैटभेश्वरी, स्त्री, (कैटभस्य कैटभपुर्य्याः ईश्वरी कर्त्री । पक्षे कैटभस्य तमोगुणस्य ईश्वरी नियन्त्री ।) दुर्गा । यथा ।
"कैटभन्तु वशं कृत्वा गृहीता तत्पुरी यथा ।
तेन सा गीयते देवी पुराणे कैटभेश्वरी" ॥
इति देवीपुराणे ४५ अध्यायः ॥

कैटर्य्यः, पुं, (किट् त्रासे + भावे घञ् । केटं त्रासं राति ददाति तिक्तादीनामातिशय्यात् । रा दाने + कः । ततः स्वार्थे ष्यञ् ।) कट्फलः । इत्यमरः । २ । ४ । ४० ॥ निम्बः । महानिम्बः । इति रत्नमाला ॥ मदनवृक्षः । इति राजनिर्घण्टः ॥

कैडर्य्यः, पुं, (कैटर्य्य + पृषोदरात् डत्वे साधुः ।) कट्फलः । पूतिकरञ्जः । कटभीवृक्षः । इति राजनिर्घण्टः ॥

कैतकं, क्ली, (केतक्या इदं "तस्येदम्" । ४ । ३ । १२० । इत्यण्) केतकीपुष्पम् । यथा । कैतकं तिक्तकटुकमिति राजवल्लभः ॥

कैतवं, क्ली, (कितव + स्वार्थे अण् ।) कपटः । (कितवस्य भावः कर्म्म वा । युवादित्वादण् ।) द्यूतः । इत्यमरः । २ । १० । ४५ ॥ वैदूर्य्यमणिः । इति राजनिर्घण्टः ॥ (कितवस्य भावः । कपटता । यथा, भागवते १ । १ । २ । "धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्" ॥)

कैदारं, क्ली, (केदाराणां क्षेत्राणां समूहः । इति अण् ।) क्षेत्रसमूहः । इत्यमरटीकायां भरतः ॥ (केदारे क्षेत्रे प्रयत्नेनानीतं यज्जलं तत्कैदारम् । तद्गुणादिकमुक्तं भावप्रकाशे यथा—
"केदारं क्षेत्रमुद्दिष्टं कैदारं तज्जलं स्मृतम् ।
कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदोषकृत्" ॥)

कैदारः, पुं, (केदारे क्षेत्रे भवः इत्यण् ।) शालिधान्यम् । इति राजनिर्घण्टः ॥ (केदारसम्बन्धिनो ये ते कैदारा इत्यर्थः । यथा, भावप्रकाशे ।
"कैदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ।
कषाया अल्पवर्च्चस्का मेध्याश्चैव बलावहाः" ॥)

कैदारकं, क्ली, (केदाराणां समूहः केदारस्य इदं वा । केदार + वुञ् ।) केदारसमूहः । क्षेत्रगणः । इत्यमरः । २ । ९ । ११ ॥

कैदारिकं, क्ली, (केदाराणां समूहः केदारे भवं तस्येदं वा । केदार + ठञ् ।) कैदारकम् । इत्यमरः । २ । ९ । ११ ॥

कैदार्य्यं, क्ली, (केदाराणां समूहः । केदार + ष्यञ् ।) क्षैत्रम् । क्षेत्रसमूहः । इत्यमरः । २ । ९ । ११ ॥

कैमुतिकः, पुं, (किमुत इत्यव्ययं तस्मात् आगतः । ठक् ।) न्यायविशेषः । तथा च छन्दोगपरिशिष्टम् ।
"वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः ।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः ॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः ।
यियासूननुगच्छन्ति संहृष्टा ह्यशरीरिणः ॥
समवायस्तु यत्रैषां तत्रान्ये बहवो मलाः ।
नूनं सर्व्वे क्षयं यान्ति किमुतैकं नदीरजः" ॥
इति प्रायश्चित्ततत्त्वम् ॥

कैरवं, क्ली, (के जले रौति कलनादं करोतीति । रु + अच् केरवः हंसः तत्पुरुषे कृतीत्यलुक् । तस्य प्रियमित्यण् ।) कुमुदम् । श्वेतोत्पलम् । इत्यमरः । १ । १० । ३७ ॥ (यथा, महाभारते १ । १ । ८६ ।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः ।
नृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम्" ॥)

कैरवः, पुं, (कुत्सितो रवो यस्य स एव स्वार्थे अण् । पृषोदरात् औकारस्य ऐकारत्वम् ।) शत्रुः । कितवः । इति मेदिनी ॥

कैरविणी, स्त्री, (कैरव पुष्करादित्वात् इनिः । ततो ङीप् ।) कुमुदिनी । इति शब्दरत्नावली ॥ (कैरवाणि सन्त्यस्यां इति इनि ङीप् च । कुमुदयुक्ता पुष्करिणी ॥)

कैरवी, स्त्री, (कैरवस्य प्रिया इत्यण् ङीप् च ।) चन्द्रिका । इति मेदिनी ॥ मेथिका । इति राजनिर्घण्टः ॥

कैरवी, [न्] पुं, (कैरवं प्रियत्वेन प्रकाश्यत्वेन वा अस्त्यस्य इति इनिः ।) चन्द्रः । इति शब्दमाला ॥

कैराटकः, पुं, (किरं पर्य्यन्तभूमिं चरमावस्थां मृत्युदशामित्यर्थः अटति प्राप्नोति यस्मात् । किर + अट् + अच् । ततः स्वार्थे कन् अण् च ।) स्थावरविषभेदः । इति हेमचन्द्रः ॥